Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

जनताया अन्धपरम्परा-परत्वम्।

—०:❀:०—

प्रणेता—श्रीदीनानाथशर्म्मा सारस्वतशास्त्री।

('मुलतान'स्थ-स० ध० सं० कालेजाऽध्यापकः)

"सनातनधर्म्मा(१) जनता प्राचीनरूढीरुपासीना (२) अन्धपरम्परा-परा वर्त्तते" इति हि वदृते वर्त्तमान 'सुधारक' व्यपदेश्यानां कदाचित् प्रवादः। परन्त्वद्यत्वे तु स तेष्वेव प्रसक्तो दरीदृश्यते। भेदोऽत्र केवलमयमेव लक्ष्यते; यत्—'सनातनधर्म्मा जनता प्राक्तनानां भविष्यद्-द्रष्टॄणामृषीणां वचनानि आयती-शुभावहानि मत्वा तानि समनुतिष्ठति स्म; परमद्यत्वे तु वार्त्तमानिकजनानां वचांसि उदर्कशून्यानि प्राचीनताशत्रूयितानि प्रजावत्यपि विचारशून्या सुधा-रकजनता तानि सर्व्वतो मन्वाना 'अन्धेनैव नीयमाना यथाऽन्धाः' इति वाक्यं चरितार्थयति।

मद्विचारेणेयं वर्त्तमानक्रान्तिर्खलु राष्ट्रिय(३)परिपत्कर्णधारस्य गान्धि-महोदयस्य नेतृत्वे १९१९ ईशवीयाऽब्दतः प्रारब्धा। स्मर्य्यताम्—'गान्धि' महोदयेन प्राग् जनता 'सत्याग्रह' पाठं पाठिता(४)। तस्मिन् समये गान्धि महोदय 'व्यक्तित्व' प्रभावेण सत्याग्रहशब्दो विश्वद्रयङ्(५)जातः। जनताऽपि च तद्भावभाविता तादृश्येव कर्म्माणि तन्वाना तत्सेवने प्रसिता जाता। केचित् तदर्थं 'सत्याग्रह' साहित्यं प्राचीचरन्; केचन तु तद्विषये व्याख्यानाख्यानं कुर्व्वाणा दृष्टाः, एके च तदर्थमन्यविधकर्म्माणि कुर्व्वन्त आलोकिषत। परं तस्य फलं किञ्जातम्—कथं वा तस्य 'सत्याग्रहस्य' दुर्व्विपाको जातः, कथं

---

(१) सनातनधर्म्मा। 'धर्म्मादनिच्'। नान्तत्वात् प्राप्तं ङीपं 'मनः' अनो बहुव्रीहे' रिति वा निषेधति। 'अन उपधालोपिन' इति ङीप् तु न; 'न संयोगाद्वमन्ताद्' इत्युपधालोपनिषेधात्।

(२) उपासीना। उपोपसृष्टादास्तेः कर्त्तरि शानचि 'ईदासः'।

(३) राष्ट्रियेति। 'राष्ट्राऽवारपाराद् घखौ' इति घः। 'आयनेयी–' इति इयादेशः। १९६ पृष्ठे मल्लेखे 'राष्ट्रीय' इति मुद्रकाणां प्रमादान्मुद्रितम्।

(४) जनता पाठं पाठिता। 'शब्दकर्म्मकाणां निजेच्छया' इति गौणे कर्म्मणि क्तः। प्रधाने तु 'जनतां पाठः पाठित' इति भवति।

(५) विश्वद्रयङ्। विश्वमञ्चति। विश्वशब्दस्य सर्वनामत्वाद् 'विष्वग्देवयोश्च' इति न शब्देन–टेरद्रिः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वाऽनुतापं बिभ्राणो गान्धिमहोदयः 'सत्याग्रहा'ऽवग्रहं व्यदधात्—जनताञ्च तस्मिन्ननधिकृताममन्यत–इति न परोक्षं तात्कालिकपरिस्थितिविदां विदाम् ।

पुनश्च तेनैव महोदयेन स्वमौनेनाऽपरितुष्यता 'स्वराज्य' साधनं 'हिन्दु-माहम्मदयोः पारस्परिकमैक्यम्' उद्घुष्टम् । जनताऽपि च 'गताऽनुगतिका' जाता । केचन तदा 'अल्लाहो अकबर' इति तारस्वरेण जोघुष्यमाणा दृष्टाः, अपरे यवनैः सह भुञ्जाना आलोकिषत । हन्त ! यैः स्वजन्मत≍प्रभृति कदाऽप्ये-कादश्यादिव्रतोपासना(१)नाऽक्रियत; त एव महाशयास्तदा 'रोजा'दिमाहम्म-दव्रतान्युपासीना अदृक्षत(२) । निर्ज्जलैकादश्याद्यवसरे ते यवनान् सितामि-श्रितजलं पाययन्तोऽपि निध्याताः । यदा कोऽपि सनातनधर्म्मा तान् 'स्वजा-तिर्दुरतिक्रमा' इति प्रबोधयति स्म; तदा ते तं स्वराज्याऽन्तर्गडुलं मत्वा घृणा-स्पृशा दृशा वीक्षन्ते स्म । परं तस्य परिणात≍कीदृशी जाता इति नाऽप्रत्यक्षं तादृशे समये वर्त्तमानानाम् । तैरेव यवनै≍पुनर्हिन्दव ईदृशं पाठं पाठिताः, यदधुना कोऽपि सुधारको हिन्दुयवनानामेकतां केनाऽप्यभिधीयमानां न मृष्यति, यवनजातिश्च स्वशत्रुं मन्यते । अस्तु ।

तदुत्तरं गान्धिमहोदयेन 'स्वराज्य' साधनम् 'असहयोगः' स्वान्तःकरणात् प्रचालितः । तस्मिन्नपि समये तदीयवैयक्तिकप्रभावेण मुग्धाऽन्धा जनता तदनुकरणप्रवणाऽजनि । केचिद् राजकीयभृतीरत्याक्षुः, अपरे कारागारं निजागारं व्यधिषत, इतरे व्याख्यानमञ्चे तद्विषये चीत्कुर्व्वन्तो निभालिताः, एके च तद्व्याजेन समाचारपत्राणि प्रचाल्य तद्विषयकलेखाँल्लिखित्वा स्वकीय-समाचारपत्रं प्रचार्य्य स्वोदरपूरणं कर्त्तुमुद्येमिरे । फलतस्सर्व्व एव गड्डलिका-प्रवाहवत् तदनुगच्छन्तोऽवलोकिताः । परं परिणतिसमसमये सोऽपि प्रस्ता-वोऽनुत्तीर्णोऽभवत् । बहूनां वराकाणां जीविका गता; बहवो वराका बन्धनादिहानी≍प्राप्नुवन्; अनल्पाः (३)क्षतक्षतवपुष्का जाताः । परं गान्धिमहोदयो जनताया एव मौर्ख्यमपिशुनयत् खेदं प्रकाश्य च 'असहयोगम्' (Non-co-operation) न्यवीवृतत् ।

---

(१) व्रतशब्दो दन्त्योष्ठ्यादिर्भवति । परं मुद्रकास्तु बवयोः साङ्कर्य्यं कुर्व्वन्ति ।

(२) अदृक्षत । दृशेः कर्म्मणि लुङि बहुवचनम् । 'न दृश' इति क्सनिषेधात् सिच् । 'लिङ्सिचा–' इति कित्त्वादयोऽभावः । चिण्वद्भावाऽभावे इदं रूपम् ; अन्यत्र 'अदर्शिषत' इति ।

(३) अनल्पाः क्षतेति । अत्र जिह्वामूलीयविसर्गस्तु न, 'शर्परे विसर्जनीय' इति शर्परकखरि विसर्गस्य विसर्गताया एवोपदेशात् ; तेन क्षकारे जिह्वामूलीयोऽक्षन्तव्यः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

कतिपयदिवसपर्य्यन्तं जोषमासीनो गान्धिमहोदयः पुनरपरं प्रकारं स्वराज्यप्राप्तेः 'सविनयाऽऽज्ञाभङ्गं' प्राचकटत् (१) खोदरदरीमुखात्। पुनर्जनताऽपि तदनुगता कारागारं 'कृष्णसदनं' मन्वानाऽपि तं नियमं परिणतौ विषं जानाना तस्माद् विरता बभूव।

पुनर्बहुसमयं यावन्मौनं बिभ्राणो गान्धिमहोदयो भूयो लवणनिर्म्माणं स्वराज्यसाधनमामनत्। बहव एव एतत्कर्म्म प्रारभन्त। केचिच्च तदर्थं स्वजीविकाहानिं कुर्व्वाणा कारागारगमनेऽपि बाध्या जाताः; परमिदमान्दोलनमपि अधुना मृतमिव जातम्। इदानीं हि गान्धिमहोदयो यरवदाकारागारमधितिष्ठन् स्वपूर्वप्रकृतिमनुसरन् स्वमौने स्वप्रभावलाघवमिव मन्वान पुनर्नवीनं स्वराज्यसाधनम् 'अस्पृश्यता-दूरीकरणम्' प्राचकाशत्। स्व'व्यक्तित्वप्रभावं' जनतायां दृष्ट्वाऽस्पृश्यतादूरीकरणस्योपायम् 'उपवासम्' अकार्षीत्। दयालुहिन्दुजनता 'अयं मृतो माभूद्' इत्यनिच्छन्त्यपि तद्वचनमूरीकृत्य अस्पृश्यतोपेक्षायां सँल्लग्ना। अधुना एतत्परिणतिस्तु भविष्यद्-गर्भे विलीना वर्त्तते। तथाऽप्यत्रैतदेवाऽनुमातुं शक्यते; यदिदमपि साधनं प्राक्तनसाधनराशिरिव सखेदं निवर्त्तयितुमापतिष्यति। अधुनाऽनेन नव्यसाधनेनाऽयं लाभो भवन्नास्ते; यद् हिन्दूनां परस्परं भेदो वृद्धिमासीदति(२)। धर्म्मो विहन्यते, भेदेच्छुकानामभिलाषा पूर्य्यमाणा निभाल्यन्ते। अस्पृश्यानाञ्च मस्तिष्कमुन्नतं क्रियते। अस्पृश्यता दूरीकरणार्थकेनाऽनेन प्रयासेनाऽधुनाऽस्पृश्याः स्पृश्या भवन्ति; स्पृश्याश्च पुनरस्पृश्या भविष्यन्ति। ते (अस्पृश्याः) आपणिका भविष्यन्ति; इमे च (स्पृश्याः) मलवाहका भविष्यन्ति। एवन्तु अस्पृश्यता स्थिरैव भाविनी(३)।

अथाऽवसरप्राप्ताऽस्पृश्योद्धारसम्बन्धेऽत्र विमृश्यते किञ्चित्। नेतृमानिनोऽभिदधति; यदस्पृश्यता केनाऽपि शास्त्रेण नोरीकृता। यदा तत्र शास्त्र-

---

(१) प्राचकटत्। प्रकटमकार्षीत्। अत्र टेर्लुप्तत्वादश्लोपित्वेन न दीर्घसन्वद्भावौ। 'प्राचीकटत्' इति तु प्रोपसृष्टात् कटतेः। तस्य लटि 'प्रकाटयति' इति। नामधातोस्तु लटि 'प्रकटयती' ति। अल्लोपस्य स्थानिवद्भावान्न वृद्धिः।

(२) स्मर्य्यतामत्र हरिद्वारेऽर्द्धकुम्भिकाऽवसरे मालवीयमहोदयस्य श्रीशङ्कराचार्य्यमहोदयानां च विसँवादः। एवमन्यत्र।

(३) एतन्निबन्धाऽवसरेऽस्माभिः श्रुतं यच्छ्रीगान्धिना पुनरस्पृश्यतादूरीकरणार्थमुपवासः प्रारब्धः। परमत्र वयं तद्-बालचापलं पश्यामः। इयमप्येका हिंसैव; यत् स्वोपवासद्वारा हैन्दवसिद्धान्तान् स आहन्ति अहिंसावादिम्मन्यः।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

वचनान्युपन्यस्यन्ते; तदा ते कथयन्ति-'प्रक्षिप्तमिदम्'। इदमेवोत्तरं दत्त्वा कृतकृत्यम्मन्या भवन्ति। इदमुत्तरं स्पष्टमेव तेषां दौर्ब्बल्यमावष्टे। इममुपयुक्ताऽवसरमासाद्य आर्य्यसामाजिकैरपि कोलाहल≍प्रारब्धः। परं तेषां नेता स्वामिदयानन्दसरस्वती तु अस्पृश्यतामन्ताऽऽसीद्। एतद् यैर्दिदृक्षणीयं स्यात्; तैर्मूलत्राणनिवासि-गोस्वामियर्य-श्रीयदुकुलभूषणशास्त्रिकृतं 'छूआछूत और आर्य्यसमाज' नामकं पुस्तकमानाय्य द्रष्टव्यम्। तत एव (१)एकद्व-प्रमाणोद्धार≍क्रियते—

'अग्नये पीवानं पृथिव्यै पीठसर्पिणं वायवे चाण्डालम्.....'यजुः अ० ३० मं० २१, अस्य मन्त्रस्य दयानन्दकृतभाष्ये 'वायवे चाण्डालम्' इत्यंशस्य 'वायुके स्पर्शके अर्थ भंगीको दूर कीजिये' इत्यर्थ≍कृतो वर्त्तते। दयानन्दकृतभावार्थे-('भङ्गीके शरीरमें आया वायु दुर्गन्धयुक्त होनेसे सेवने योग्य नहीं होता') तु स्फुटमेवाऽस्पृश्यता साधिता। एतदध्यायीयसप्तममन्त्रस्य भावार्थे तेन 'चाण्डालादिको दूर बसावें' इति व्यक्तीकृतम्।

अथ च 'अस्पृष्टा अस्पृश्या यवना भविष्यन्तीत्यत एव अस्पृश्यता दवयितव्या' इति नेतृम्मन्यानां कथनमपि न विचारचारु। यद्यद्य ते स्पर्शार्थमिमां विभीषिकां प्रददति, (२) तदा अन्यदा ते भोजनविवाहसम्बन्धादिकार्थमपि विभीषिका≍प्रदास्यन्ति; तर्हि किं भवन्तो मंस्यन्ते। तान् भवन्तो यवनान् भवतो वीक्ष्य स्वा बालिकास्तेभ्य≍प्रदास्यथ? 'त एवं न करिष्यन्ति'-इदमपि न शक्यं वक्तुम्। यथा प्राक् तेषां मन्दिरप्रवेशाद्यान्दोलनं स्वप्नेऽप्यस्माभिर्नाऽनुभूतं तदेवाऽद्य नेतॄणां कृपया दृश्यते। तथेदमपि परस्ताद् द्रक्ष्यते। ते च (नेतारः) इममुद्यमं केवलं हिन्दूनां सङ्ख्यावृद्धयायेव कुर्व्वते; तर्हीदृश्या सङ्ख्यावृद्धया को लाभो यथाऽस्माकं विधर्म्मिभ्यो भेद एव नाऽवतिष्ठेत। हिन्दूनां सङ्ख्या हिन्दुत्व एव वर्द्धिता भविष्यति' एवन्तु अस्माकं यवनेभ्य आङ्ग्लेभ्योऽपि च तर्हि को भेदः, सर्व्व एव हिन्दुसङ्ख्यायां लेखयितव्याः, श्रेयानयमुपायः सङ्ख्यावृद्धौ। परमेतदवश्यं ध्येयम्—

'एकश्चन्द्रस्तमो हन्ति न च तारासहस्रकम्'। अत्र 'सुप्रभात' प्रथमवर्षीयदशमसङ्ख्यायां प्रकाशितो मत्सन्दृब्धः श्लोकोऽपि द्रष्टव्यः—

(१) एकद्वेति। एको द्वौ वेति विग्रहे 'सङ्ख्ययाऽव्यया—' इति बहुव्रीहिः। 'बहुव्रीहौ संख्येये' इति डच्। टेर्लोपः।

(२) एवमेव एतद्विषये गान्ध्यादीनामुपवासोऽप्यनुचितविभीषिकैव। तैस्स्वकीयजनतावर्त्तिनः प्रभावस्य दुरुपयोग एव विधीयते। वत!

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

"अस्पृश्यानाञ्जनानां मनुतनुजनुषः शुद्धिलग्नास्तथा तै-
'रोटीं' 'वेटीं' प्रबन्धं, रतनिजमतयः स्वैक्यसंलग्नचित्ताः ।
व्यर्थस्तेषां प्रयासो नहि शतकमपि क्रोष्टुवर्गस्य किञ्चि-
च्छक्तं कार्य्यं विधातुं भवति खलु यथा केसरिक्षुद्रपोतः" ।

गान्धिमहोदयोऽस्पृश्यताकलङ्कं दिदवयिषति; परमस्पृश्यतया तु येन केनचिद्रूपेण स्थातव्यमेव । एतद्विस्मयाऽस्पदम्-स (गान्धिः) तान् अस्पृश्यतातोऽपसारयति; स्पृश्याँश्चादिशति; यदन्यदीयान् पुरीषालयाँस्ते शोधयन्तु । बत ! समाजे उच्चताऽप्यपेक्षिता भवति नीचताऽपि; सर्व्वे एव उच्चा भवन्तु चेत् साधारणकार्य्याणि कस्तावत् कुर्य्यात् । सर्व्वे बी० ए० परीक्षोत्तीर्णा भवन्तु चेत्; भारवाहक (कुली) कृत्यं को विदधीत । नीचा अपि यदि उच्चनिर्व्विशेषाऽक्रियेरँस्तर्हि तेषां साधारणकृत्यनिष्पादने रुचिरेवा न प्रवर्त्तेत । इदमेव वैज्ञानिकरहस्यमाश्रित्य चातुर्वर्ण्यं सुष्ठु वर्त्तते । यदि नीचोच्चता कर्म्मणा कृताऽभविष्यत्; तदाऽपि महत्यव्यवस्थाऽभविष्यत् । अत एव जन्मना सा नियमिता । तेन काऽप्यव्यवस्था न भवितुमर्हति । तर्हि वर्णव्यवस्थाऽनुसारञ्च येषां ये ये धर्म्मा मताः; तेषां तथैव विधाने समाजस्थितिरक्षणा भवितुमर्हति । अत एव गीतायां पौनःपुन्येनैव गीतमेतत्—

'स्वे स्वे कर्म्मण्यभिरतः संसिद्धिं लभते नरः' ।
'श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात्' ।
'स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः' ।
'स्वभावनियतं कर्म्म कुर्वन् नाप्नोति किल्बिषम्' ।
'सहजं कर्म्म कौन्तेय ! सदोषमपि न त्यजेत्' ।

मनुनाऽप्युक्तम्—

'वरं स्वधर्म्मो विगुणो न पारक्यः स्वनुष्ठितः' ।

अथ च स्पर्शादिकसौविध्येन भवन्तऽपरस्परं प्रेम मन्वते । तर्हि वालिसुग्रीवयो रावणविभीषणयोऽकौरवपाण्डवादीनाञ्च किमु परस्परं स्पर्शो न भवति स्म ? किमेते इतरेतरमस्पृश्यं मन्यन्ते स्म ? तर्हि कथमेषु कलह आसीत् ? अथ च ऋतुकाले स्वस्त्रियमस्पृशताम् अपवित्रत्वे स्वपुत्रमप्यस्पृशतां च नऽकिं तैः सह प्रेम नश्यति ?

यदि भवद्भिः सर्व्वेषां शरीरसाम्यमेव दर्शयित्वाऽस्पृश्यानामपि समानाऽधिकार आख्यायते; तदर्थञ्च शास्त्राज्ञाऽवहेल्यते; तर्हि किं कारणम् ? भवन्तः स्वभगिन्या विवाहं न कुर्व्वन्ति ? शरीरसाम्यं तु तत्राऽपि, कथं न तत्र पत्नीवद्

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

व्यवहरन्ति ? प्रत्युत एतदाख्याने भवन्तोऽस्मभ्यं क्रुध्यन्ति । तत्र किं कारणम् ? केवलं शास्त्रस्याऽपरिहार्य्यतैव । शास्त्रमाप्तवचनभूतम् । युक्तिभिर्भवन्तः स्वजनकमपि स्वजनकं साधयितुमनलम्भूष्णवः, यतो भवतां न तत्र प्रत्यक्षम्, नाऽप्यनुमानम् । तत्राप्तवचनमेव प्रमाणं भवति, यदयम्भावत्कपिता । एवमेव परमात्मसिद्धिरपि द्रष्टव्या । तेन यदा भवत्कृते शास्त्रपराङ्मुखताऽश्रेयसी; कथं तर्हि भवन्तोऽधुना शास्त्रविरुद्धमनुतिष्ठन्ति । भवतां कथनमात्रेण शास्त्राणि कथमनृततामेष्यन्ति ? एवं तु वेदोऽपि भवद्भिस्त्यक्तव्यो भविष्यति । परमेश्वरेणाऽसौ रचित इत्यत्र भवतां पार्श्वे न किमपि प्रमाणम् । वेदप्रमाणानि च 'न हि सुशिक्षितोऽपि वटुः स्वस्कन्धमारोढुं पटु' रिति न्यायान्न प्रमाणानि । तत्र भवन्तः स्मृत्यादीन् प्रमाणपदे दर्शयिष्यन्ति, आस्तिक्यं च स्वकीयं दर्शयिष्यन्ति । परमस्मिन्नान्दोलने भवद्भिः स्मृत्यादिशास्त्रं कथमुपेक्ष्यते; कथञ्च नास्तिकताऽवलम्ब्यते ? भवद्विषये तु गोस्वामिश्रीमद्गोकुलनाथमहाराजानाम् अधस्तन्युक्तिर्यद्—"येषामधर्म्म एव धर्मः, दुराग्रह एव सत्याग्रहः, स्वैराचार एव स्वातन्त्र्यम्, स्वमतमेव शास्त्रमतम्, ऐहिकसुखमेव परमानन्दः, सतां मानखण्डनमेव स्वमतमण्डनम्, नियमभङ्ग एव विनयः, अविनय एव सत्यप्रियत्वम्, एव मादिगुणान् धारयन्तोऽपि लोकाऽभ्युदयाय प्रयतन्ते ते, तदेवाश्चर्य्यम्—" । इति सर्व्वांशे घटते ।

कथं भवद्भिक्वाचित्काऽर्थवादवचनानि समुपन्यस्य साधारणधर्म्मोऽपाक्रियते; ? 'सामान्यातिदेशे विशेषाऽनतिदेश इति हि न्यायः । इतिहासवार्त्ताः सर्व्वा आचरणीया न भवन्ति; किन्तु विधिवाक्यान्येव आचरणीयानि भवन्ति; अन्यथा द्रौपदीवत् स्त्रीणां बहुपतित्वमपि विधेयम्, रावणवच्च परकीया दारा अप्यपहर्त्तव्याः ।

कथनस्येदमेवाऽभिसंहितम्; यत्-प्राचीनैर्य्यें नियमाप्रचालिता आसन्; ते धर्म्मस्य वृद्धिकरास्सन्तपुंसामपि लाभलम्भका अविद्यन्त । तत्प्रमाणमेतदेव; ते परस्कोटिवर्षेभ्यप्रचलन्तोऽपि अद्याऽपि तदवस्थास्सन्ति । न तैर्नियमैकेषामपि हानिर्भवति; न बन्धनालया गन्तव्या भवन्ति, न जीविका व्याहन्तव्या भवति; न तदर्थं धननाशो विधातव्यो भवति, न तदर्थं समाचारपत्राणां स्तम्भा अत्युक्त्यनृततामिश्रितोक्तिभिकलुषयितव्या भवन्ति; न वा परिणतौ दुरुद्कर्कता निध्यातव्या भवति । तैप्राचीना शृङ्खला न भिद्यते, अत एव काऽप्यशान्तिरपि न भवति; अत एव तेषां नियमानां प्रवर्त्तनं, तदनुकरणं, तदनुगमनञ्च अन्धपरम्पराव्यपदेश्यमपि न हानिप्रापकम् । अद्यतनाना-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मदूरदर्शिनां जनानां तु वचनानि आपातमनोहराण्यपि अनुपदमेव दुर्व्विलसितानि दर्शयन्ति सन्ति । परमेतत् प्रजानती अपि जनता तेषां वचनान्यनुगच्छन्ती अनुकुर्व्वती च धर्म्मपराङ्मुखतायै अपि उद्यच्छते। अत एव कथं न(१)वदाम; यदियं सुधारकजनतैव अन्धपरम्परा-परा; न किल सनातनधर्म्मा तादृशी । अन्ते लवपुरीयसंस्कृतपत्रे 'उद्योत' दशमसङ्ख्यायां (जनवरी सन् १९२९) 'हैन्दवसङ्ख्याहसिम-निदानविमर्श' इति स्वकीयनिबन्धस्याऽन्ते प्रकाशितं स्वसन्दृब्धमेव वचनमुद्धृत्येमं लेखं समापयामि । तदित्थम्—

"अद्यत्वेऽस्माभिर्हिन्दुष्वेतदनुभूतमेव, यत् पश्चाऽद्युत्तरमेव एषां विचारवैचित्र्यं जायते । यदा यैव एषां विचारधारा प्रसरेत्; सैवैषां दृष्टिकोणे 'धर्म्मो' भवति । सैव एषां 'वेदे' दृश्यते । प्राचीना एषां रूढ्यश्च नवीनतां स्पृशन्ति; नव्याश्च प्राचीनतां गाहन्ते । एवमेव जातायां सत्यां विचारधारायाम्; एतद्रोधे चाऽननुष्ठिते सति—'सत्यं वदामि–' इयमार्य्यजातिर्नाम-मात्रेणैव इतराऽनार्य्यजातिभ्यो भेदं स्पर्ध्यति; इयञ्च सर्व्वाऽवस्थास्वेव आङ्गलाद्यनार्य्यजात्यन्तर्लीना सती स्वस्वरूपं स्वसत्ताञ्च व्यावयिष्यति । नेयं वैशद्याऽनपेता भणितिर्व्यभिचारकोटिमाटीकेत;न वेयञ्च केनाऽप्यन्यथयितुं शक्येत; नाऽत्र विषये कोऽपि(२) विशयोऽवसेयः । इयमस्मज्जातिरधुनाऽग्रेऽमृतं गवेषयते; परं परिणामं विषोपमं न विविनक्ति ।"

हसिमकारणविवेके तत्र तृतीयकारणे याऽस्माभिर्भविष्यद्वाणी कृता; साऽधुना सत्यतामश्नुवाना निभाल्यते; साऽपि प्रदर्श्यते—"तार्त्तीयीकं कारणम् उत्तरोत्तरं सुविधाप्रदानमेव सङ्ख्याऽहगीयस्त्वे । केचिन्नव्याः सुधारका अधिधर्म्मं प्रविश्य तद्रहस्यमनाकलयन्तो विषयाऽभिलाषुकाणां स्वार्थव्यग्राणां वा पुंसां कृते समाजद्वारा काश्चित् सुविधा विधापयन्ति, अनुष्ठापितवन्तश्च । तद्दुर्व्विलसितमेतदेव जायमानमनुभूयते, यद्–अन्ये अन्या अपि सुविधा ईप्सन्ति । सौविध्याऽदाने सति धर्म्माभासान्तराश्रयणविभीषिकामपि ददति; धर्म्मान्तराण्याश्रयन्तेऽपि । एवमेव तेषां स्वार्थकाम्यतां सर्व्वेऽभिलाषा~पूर्णीक्रियेरँश्चेत्; तदा इतरधर्म्माभासेभ्योऽस्य धर्म्मस्य वैशिष्ट्यं भेदो वा नाऽवशिष्येत । केचिन्महात्मानः सुविधाऽनर्प्पणमेव हिन्दुसंख्याह्रासे

(१) 'वदाम' इति लोटि 'नित्यं ङित' इति सलोपः, 'लोटो लङ्वद्' इत्यतिदेशात् । मदीये गतलेखे मुद्रकाणामेवाऽसावधानतया १९२ पृष्ठे 'प्रवर्त्तयाम' 'प्राचालयाम' 'स्पृहयेम' प्रभृति लोट्–लङ्–लिङ्प्रयोगेषु विसर्गा मुद्रिताः । अन्यत्र बवयोर्व्यत्ययश्च कृतः ।

(२) विशयः–सन्देहः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

निदानं व्यपदिशन्ति, परं वयमेतद्-विप्रतिपन्ना वर्त्तामहे। पूर्व्वमेवाऽन्याय्य-सुविधाविश्राणनस्यैवतद् दुर्व्विलसितम् । अधुनाऽस्पृश्येभ्यो याः सुविधा वितीर्य्यन्ते, परस्तादेतस्य यत्परिणामो भावी, स दूरदृष्ट्या निभालनीयः" ।

इयं १९२९ वर्षस्य वार्णी १९३३ वर्षे प्रत्यक्षमनुभूयमाना निभाल्यते । अन्तेवयं नेतृम्मन्यान् अनुरुन्ध्महे; यत्ते अस्पृश्यानामार्थिकदशासुधारण एव प्रयतन्ताम्; न तु तेभ्यश्शास्त्रविरुद्धाधिकारदापने शक्तेरपव्ययं कुर्व्वन्तु । जनतामपि प्रार्थयामहे; यच्छास्त्रविरुद्धं किमपि कार्य्यं न तया कार्य्यम् । अन्यथा याऽधुना तदीया दुरवस्था विराजतेः अग्रे एतामपेक्ष्याऽपि अधिकतां स्पर्द्धयति सा । खलु मुखरतां कृत्वेति ।

श्रीशारदाऽष्टकम् ।

—:○०○:—

ले०—पं० श्रीशिवशङ्कर झाः शर्म्मा, साहित्याचार्य्यः ।

"जनकपुरस्थ" राजकीयसंस्कृतविद्यालयाऽध्यापकः ।"

देवी गिरां दिविषदैः प्रणता प्रसन्ना, सन्नारदादि-मुनिभिः श्रितपादपद्मा ।
सद्मा श्रुतेश्शमनभीतिविनाशदक्षा, रक्षापरा विजयते वरपुस्तहस्ता ॥ १ ॥
मातः ! समस्तनिगमाऽऽगमकल्पवल्ली सँल्लीनमानसतया भवतीञ्जना ये ।
आद्यां श्रयन्ति शुभदां कमनीयकान्तिं भ्रान्तिन्न यान्ति कृतिनो विदिताऽऽत्मतत्त्वाः॥
तत्प्रार्थयामि वरदे ! वरदेवतान्त्वां शान्तां सुधेव धवलां परमेष्ठिकान्ताम् ।
किं भारतं नहि निजैः करुणाकटाक्षैः सम्भाल्य भारतममुं कुरुषे रुषेव ॥ ३ ॥
ये पुत्रकास्तव विदः परमे ! जगत्यां गत्यां गता गुरुतया पथदर्शकत्वम् ।
ते कापथस्य पथिका निजशास्त्रदीपं हित्वा भवन्ति किमतो न च दूयसे त्वम्॥४॥
कीलालया-सहचरी-कबरी-द्विरेफी-संसक्तपादकमलां सरलां सुरेशीम् ।
वीणाधरां विविधमङ्गलदानशीलां त्वां ज्ञानदां मदनुदां भजते जनोऽयम् ॥५॥
ज्ञानाऽर्य्यमा भवतमोनिखिलं निवार्य्य कार्य्ये सहायमकरोदिह भारते नः ।
तत्रैव रिङ्गणगणो लभते प्रतिष्ठां, तिष्ठामि कुत्र यदि नो दयते दया ते ॥ ६ ॥
अन्धत्वमापयति यद्द्रविणौघवर्षं तर्षं प्रकर्षयति तन्नच कामयेऽहम् ।
सत्यं शिवं पदमुदेति यतोऽम्ब ! नॄणां तां भारतीमभिलषे जननीङ्कवीनाम् ॥७॥
वार्णी "वसन्ततिलका" श्चितचारुमूर्त्तिश्चञ्चन्मणिप्रकररञ्जितदामभूषाम् ।
कुन्दैः सरस्वति! मधौ सुमनोभिरर्च्यां सम्पूज्य मोक्षपदवीमधियान्ति विज्ञाः॥८॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

गीर्वाणवाण्या अभ्युदयोपायाः ।❀

ले०—डाक्टर श्रीमङ्गलदेवशास्त्री विद्यारत्न एम्० ए०, डी० फिल०,
(आक्सफोर्ड) ।

तापत्रयावलिविमूर्च्छित चेतनाना-
मात्मस्वरूपमवमत्य सदा स्थितानाम् ।
अज्ञाननाशनपटूनवबोधहेतून्
वेदान्विकासयति यस्तमहं नतोऽस्मि ॥
विनयभाववशेन नतेन तं
त्रिभुवनाधिपतिं शिरसा ततम् ।
अमितमोदयुतं करुणानिधि-
मविदितं परितोषयितुं यते ॥

अयि भो ! अशेषशास्त्रतत्त्वानुशीलनसञ्जातनिर्मलशेमुषीकाः सामाजिकाः ! श्रीमतां समक्षं देववाण्याः समुन्नतेरुपायमधिकृत्योपन्यसितुं प्रवृत्तस्य यत्सत्यं वेपत इव मे हृदयम् । तथाहि—

नाना शास्त्रविचक्षणोऽपि प्रथमं प्राप्तः सभां मानवः
सम्यक्पारयते न भावकथने संकोचवश्यः सदा ।
चित्रं नो यदि वेपनं मम हृदः सञ्जायते सम्प्रति
यस्मान्नास्मि विचक्षणः, पुनरियं संसत्सतां नूतना ॥

अथापि श्रीमतामादेशरूपं महान्तमनुग्रहं शिरसा बिभ्राणः-

चन्द्रोदये तु सत्यपि द्विजवृन्दं किन्न भासते गगने ?
तद्वद्विदुषां मध्येऽप्रौढोऽपि न दोषभाक्कथने ॥

इत्यस्मिन्नर्थे च श्रद्दधानः

नीरसमपि मम वचनं कृत्वा करुणां सुशीलसम्भूताम् ।
आकर्णयन्तु भव्याः सन्तस्तुष्यन्ति परभणितौ ॥

इत्येवं तत्र भवतामवधानं दीयमानमभ्यर्थये ।

सभ्याः ! अद्य खलु कथं नु देववाण्याः समुन्नतिर्भवेदित्यस्मिन्विषये किञ्चिदावेदयितुं समादिष्टोऽहं श्रीमद्भिः । महानेष गभीरो विषयः-विशेषतो मादृशां विषये-नैकशास्त्रनैकभाषापरिशीलनापेक्षी च । उन्नत्यवनतिव्यवहारस्य सापेक्षत्वेन कस्या अपि भाषाया उन्नत्यवनत्योरवधारणाय नैकभाषाणां

❀ लेखकस्य 'प्रबन्धप्रकाश' नामक ग्रन्थात् समुद्धृतोऽयं प्रबन्धः ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

तारतम्यपरीक्षणस्यावश्यकत्वात् तद्विषयकज्ञानस्यास्मिन्विषये नितरामावश्यकत्वम् । कस्या अपि भाषाया वस्तुस्थितेरवगत्यै च तदन्तर्गतनानाशास्त्राणामवस्थाया अपि ज्ञानमपरिहार्यम् इति नैकशास्त्रपरिशीलनस्याप्यावश्यकत्वं स्फुटमेव । तथापि यथामति विषयेऽस्मिन् भवतां पुरः किञ्चिद्वक्तुमुपक्रमे ।

इह खलु परिवृत्तिशालिनि जगति तत्रापि जाग्रत्यतिमानमहिम्नि काले कस्यापि सर्वदैकरसेनैवावस्थिति र्नितरामसम्भवा । सर्वमपि वस्तु परवशं चक्रनेमिक्रमेण नानावस्थाः समुपभुङ्क्ते । यत्र दिनं तत्र रात्रिः, यत्र च रात्रिस्तत्र दिनं पर्यायानुसारमाविर्भवति ।

एतन्निमयानुरूपमेव चिराज्जगदिदमुन्नतिपथानुगं सम्प्रति समालोच्यते । उदयाचलमारूढो भगवान् ज्ञानभास्वान् भुवनमाभासयितुं प्रवृत्तः । सर्वोऽप्यविद्यातमिस्रापगमे मोहनिद्रामुन्मुच्य स्वीय-स्वीयपदार्थजातपरीक्षणपरो दृष्टिपथमायाति ।

अनुसरन्त एवैतन्नियमं चिरादस्मद्देशीया देववाण्याः स्वरूपमालोचयितुमुद्यतास्तदुन्नतेरुपायपरिमार्गणपराः सन्ति । न च उन्नतेरुपायचिन्तनमवनतिमादौ स्थापयति । तत्र "सति कुड्ये चित्रम्" इति न्यायेन देववाण्या अवनतेरभावात्तदुन्नत्युपायचिन्तनस्यामूलकत्वं वैयर्थ्यापत्तिश्चेति वाच्यम् ।

तदवनतेः साम्प्रतं साक्षात्त्वात्, सर्वैः स्वीकृतत्वाच्च । तत्रैते श्लोका भवन्ति—

दैवी वाणी पुरा यासीदुन्नतेरासने स्थिता ।
दौर्भाग्येणास्य देशस्य दुर्दशामद्य सा गता ॥
या प्राचीननिबन्धेषु लोकभाषेति वर्णिता ।
भारतान्येषु देशेषु कम्बोजादिषु भाषिता ॥
सैकस्यापि नरस्याद्य न भाषात्वेन गण्यते ।
अथापि मृतभाषेति लोकैर्हा ! सातिनिन्द्यते ॥
विस्तरः क्वान्यभाषाणां तदवस्था च सम्प्रति ।
क्व चैषा देववाणी हा ! महान् भेदः प्रतीयते ॥
भोजविक्रमवत्कोऽपि न तस्याः पोषकः क्वचित् ।
प्रष्टारः सन्ति सर्वत्र ह्यन्यासां कोऽत्र संशयः ॥
कूपोदकं यथा तद्वद् रुद्धं बद्धं च वाङ्मयम् ।
पुरावन्नाद्य विद्वांसो दृश्यन्ते भारते क्वचित् ॥

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

भव्याः! नेयमत्युक्तिः। यत्रास्मात्कालात् स्थूलदृष्ट्या चतुर्दशशत-संवत्सरेभ्यः प्रागपि—

पुरा विद्वत्तासीदुपशमवतां क्लेशहतये
गता कालेनासौ विषयसुखसिद्ध्यै विषयिणाम्।
इदानीं तु प्रेक्ष्य क्षितितलभृतः शास्त्रविमुखान्।
अहो कष्टं! सापि प्रतिदिनमधोऽधः प्रविशति॥

इत्येवं राजर्षिणा भर्तृहरिणा तस्या अवनतिः प्रदर्शिता, तत्राद्य सम्यक् प्रवृत्ते सर्वथा प्रतिकूले वर्तमाने काले, सम्प्रतिष्ठिते चान्यभाषाणां साम्राज्ये, तस्या अवनतिं प्रति नहि भवितुमर्हति संशयलेशावकाशः। तदेवं पूर्वमेवोन्नतिसद्भावात्तदुन्नतेर्नापेक्षितत्वमिति वदन्तः परास्ताः।

ततश्च दृष्ट्वाप्येतां सर्वलोकविदितां देववाण्या अवनतिम्, स्मृत्वापि तस्या नाम्नैव समाख्यातं त्रिलोक्यामसाधारणं पूर्वकालीनं परमं यशः को नाम भारत-बन्धुर्धर्मधुरीणो धीमांस्तदुन्नत्युपाय-समालोचने मन्दप्रयत्नो भविष्यति?

तत्र "प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते" इति न्यायानुसारेणैतत्तावद् विचारणीयं यत् किन्नु खल्वस्मिन् प्रसङ्गे उन्नतिशब्देनाभिप्रेयते, कथं च तत्स्वरूपनिर्णयः कर्त्तुं शक्यत इति। एतद्विचारानन्तरमेव तस्या उन्नत्युपायचिन्तनमवसरप्राप्तत्वेन समुपयुज्यते। तत्साधनार्थं च प्रयतितुं शक्यते। तदत्र प्रथममेतदेवाधस्ताद् विचार्यते।

अद्यत्वे तावत् कस्याश्चिद् भाषाया उन्नतिस्वरूपनिर्णये प्रवृत्तेनानेक-विषयेषु दृष्टेरनुधावनमाकाङ्क्ष्यते। शब्दान्तरेष्वयमेवार्थ एवं वक्तुं शक्यते यत् कस्याश्चिद् भाषाया उन्नतिस्वरूपपरीक्षणायैता स्तावदधो निर्दिष्टा वार्त्ता समालोचनीयाः—

(१) प्रथमं तावत्तस्या भाषाया भाषिणां संख्या।

(२) द्वितीयं देशापेक्षया तस्या विस्तृतिः। अर्थात् कियान् देशः, को देशः, कति देशा वा तां भाषां भाषन्ते। तद्यथा इंग्लिशभाषाभाषिणां संख्या सामान्येन पञ्चदशकोटिपरिमितास्ति। स्थूलदृष्ट्या सप्तसु अष्टसु वा देशेषु, अगणितेषु प्रदेशेषु, द्वीपेषु च सा भाष्यते।

परमर्थद्वयमप्येतदद्यत्वे भाष्यमाणानां भाषाणां विचारप्रसङ्ग एव समीक्षितुं शक्यते। प्राचीनभाषाणां अथवा तासां भाषाणां विषये तु याः सम्प्रति कुत्रापि न भाष्यन्ते, अपि तु पुराकाल एव याः कस्मिन्नपि देशे भाषिता आसन्, नैतद् विचारणीयं भवति। यतो नाद्यत्व एकोऽप्येतादृशो मानवो

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

यस्यैकापि तासां स्वभावतो मातृभाषा भवेत् । दौर्भाग्येणास्माकं देववाण्यप्येतद् द्वितीयकोट्यामेव पतिता भवति । साम्प्रतं न क्वापि केनापि स्वभावतो मातृभाषात्वेन भाष्यते ।

(३) तृतीयं तदीयसाहित्यस्य विस्तर उपयोगिता (उपादेयता) वर्तमानकालप्रवाहस्तदध्ययनाध्यापन सौलभ्यं च ।

अस्यार्थस्य समीक्षणं प्राचीनोत्कृष्टभाषाणामाधुनिकभाषाणां च स्वरूपावधारणे समानत्वेनोपयोगि । अत एव च प्रधानम् । युक्तं चैतत् । साहित्येनैव हि कस्याश्चिद् भाषाया गौरवं महिमा च वस्तुतः प्रतीयते । साहित्यमेव भाषायाः स्थिरा सम्पत्तिरन्ततः शेवधिश्च । सभ्यताया उत्कर्षापकर्षौ, दर्पणे रूपमिव सद्यः साहित्य एव प्रतिबिम्बीभावमापद्येते । साहित्यद्वारैव पूर्वपूर्वैः ऋषिभिर्महर्षिभि र्मुनिभिराचार्यैः कविभिश्च "साक्षात्कृतधर्माण ऋषयो बभूवुस्तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुरुपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च" (निरुक्ते १२०) इति, किं पुनराप्तानां प्रामाण्यम् ? साक्षात् कृतधर्मता भूतदया यथाभूतार्थचिख्यापयिषेति । आप्ताः खलु साक्षात्कृतधर्माण इदं हातव्यमिदमस्य हानि हेतुरिदमस्याधिगन्तव्यमिदमस्याधिगमहेतुरिति भूतान्यनुकम्पन्ते । तेषां खलु वै प्राणभृतां स्वयमनवबुध्यमानानां नान्यदुपदेशावबोधकारणमस्ति । न चानवबोधे समीहावर्जनं वा । न वाकृत्वा स्वस्तिभावो नाप्यस्यान्य उपकारकोऽप्यस्ति । हन्त ! वयमेभ्यो यथादर्शनं यथाभूतमुपदिशामस्त इमे श्रुत्वा प्रतिपद्यमाना हेयं हास्यन्त्यधिगन्तव्यमेवाधिगमिष्यन्तीति । एवमाप्तोपदेशः ।" (न्यायभाष्ये २।१।६८) इत्याद्यनुसारमनुकम्पापरैः प्रज्वालितं ज्ञानज्योतिः स्थूलसूक्ष्माद्यनेकविधपदार्थजातविषयकं तेषामनुभवं विचारं च प्रख्यापयत् सहस्रशो वर्षेष्वतीतेष्वपि उत्तरोत्तरं विवर्द्धमानमद्यापि समुद्भासमानं संदृश्यते । यद् विषये हि—

ब्रह्मादयो विश्वहिताय तप्त्वा परः सहस्रा शरदस्तपांसि ।
एतान्यपश्यन् मुनयः पुराणाः स्वान्येव तेजांसि तपोमयानि ॥

इति किञ्चित् परिवर्तिता महाकविभवभूतेरुक्तिर्वक्तुरभिप्रेतप्रसङ्गभङ्गेऽपि सम्यक् संगच्छते ।

ततश्च कस्या अपि भाषायाः स्वरूपनिर्णय एतदेव मुख्यतो विचारणीयं भवति यदस्ति किञ्चित् सर्वमनोहारि निखिलपुरुषार्थसाधकमखिल-दुरितापहारकं च तत्सारभूतं साहित्यं तस्यां भाषायाम् । सत्यपि च तस्मिन् विष-

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

याणां समष्टि व्यष्टिदृष्ट्या कियांस्तस्य विस्तरः कियच्च गाम्भीर्यम् । अथवा भिन्नभिन्नदेशकालेषु वर्तमानाभिर्मनुष्यजातिभिः प्रचारितेषु समुन्नतिपदं च नीतेषु नानापुरुषार्थोपयोगिषु दर्शनविज्ञान-धर्म्मशास्त्रकाव्य-सङ्गीतादि-विषयेषु शास्त्रेषु तदवस्था या तारतम्यदृष्ट्या कस्य कस्य शास्त्रस्य केन केन च परिमाणेन प्रचारणं समुन्नतिश्च सम्पादिते तस्यां भाषायाम्, सत्स्वपि च नानाविषयकगूढ़गम्भीरनिबन्धेषु कियती तेषामुपयोगिता उपायदेयता च । उपादेयता सद्भावेऽपि, एतदपि समीक्षणीयं यदद्यत्वे कीदृशी तस्य साहित्यस्य गतिः, उन्नतिमुखी किं वावनतिमुखी । अथवा नानादेशीयशास्त्राणामुन्नतेरपेक्षया तस्य गतिः सन्तोषावहा न वा । अन्तत एतदपि विचारणीयं यत् तत्साहित्य ज्योतिःप्रकाशोऽन्तरायमन्तरेण सर्वसाधारणान् यावदधिगन्तुं शक्नोति न वा । शब्दान्तरेषु तदध्ययनाध्यापनसौलभ्यमपि वर्तते न वा । देववाण्याः साहित्यस्य तावदतिविस्तृतत्वे परमोत्कृष्टत्व उपादेयतायां च दिष्ट्या नहि कश्चिद् विवादः । संसारे नहि काचिदेतादृशी भाषा यस्याः साहित्यं प्राचीनतादृष्ट्यास्याः साहित्यस्य समतामासादयेत् ।

विस्तृत्यपेक्षयापि 'ग्रीक' लैटिन, इत्यादि परमप्रसिद्ध-प्राचीनोत्कृष्टभाषाणां कयोरपि द्वयोः साहित्यमेकत्रीकृतमपि न तावद् विस्तृतं देववाण्याः । न चापि देववाणीसाहित्यं साकल्येनाद्य यावत् समुपलभ्यते सहस्रशो ग्रन्थानां ग्रन्थकाराणां च केवलं नाममात्रेणैवोल्लेखो नानाग्रन्थेषु दृश्यते । निरन्तरं च च प्रकाश्यन्ते नूतननूतनग्रन्थरत्नानि प्राचीनसंस्कृतग्रन्थोद्धारतत्पराभिर्नैकसंस्थाभिः । तदेतत्सर्वं देववाण्याः साहित्यस्य निरुपमां विस्तृतिमेव ख्यापयति । द्योतयति च "कलां नार्हन्ति षोडशीम्" इत्यस्य चरितार्थतां संस्कृतापेक्षया उपर्युक्त 'लैटिन' आदिभाषाव्यक्तिरिक्तप्राचीनभाषाणां विषये । अर्थगाम्भीर्यभाव सौन्दर्याद्यपेक्षयापि संसारभाषाणां न केवलं प्राचीनानां किन्तु आधुनिकीनामपि शिरोमणिभूतैव नो देववाणी । उपनिषदो भगवद्गीता दर्शनशास्त्राणि, भागवतम्, शाकुन्तलम्, उत्तररामचरितम् इत्याद्यलौकिकसाहित्यरत्नैरलङ्कृता सा सहस्रैवान्या भाषा अतिक्रामति । एकैकमपि हि एतादृशं साहित्यरत्नं कस्या अपि भाषायाः सौभाग्यसम्पादनायालं गौरवास्पदं च । धर्मार्थमोक्षाख्यानखिलानेव च पुरुषार्थान् लक्ष्यीकृत्य प्रवृत्तं तत् साहित्यम् । अत एव च सर्वाङ्गसम्पूर्णम् । न केवलमेतावतैव तस्याः प्राधान्यम् । अतिप्राचीनत्वेनास्या वेदादिरूपसाहित्यभागस्य नानाविषयाणां तुलनात्मकदृष्ट्याध्ययनेऽप्यतीवोपयोगिनी देववाणी । अस्याः शब्दरचनायाश्चातिस्पष्टतया चिरकालादेव च लोकोत्तरप्रतिभानवद्भिराचार्यैर्व्याकृत्वेन निरुक्तत्वेन च स्वपरिवारसम्बन्धिनीनां 'इंग्लिश' जर्मन, ग्रीक, लैटिन प्रभृतीनां भाषाणामध्ययने चास्याः परमोपयोगित्वं भाषाशास्त्रवेदिनः कस्य नाविदितम् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अत एव 'जर्मनी' अमरीका इत्यादि सुदूरनानादेशेषु शतशोऽध्यापकाश्छात्राश्च तदध्ययनाध्यापनतत्पराः श्रूयन्ते । भारतवर्षीयान् प्रति तु तस्या उपयोगित्व-प्रतिपादनं केवलं पुनरुक्तिरेव । न केवलं तेषामतिप्राचीनेतिहासो नितान्तं देववाण्या अध्ययनादेवावगम्यते, तेषां सभ्यताया धार्मिकविश्वासानां च प्रासादस्य मूलभित्तिरपि संस्कृतसाहित्य एवावतिष्ठते । आधुनिक 'हिन्दी' बङ्गाली, प्रभृति भाषाणामप्यन्ततः संस्कृतमेवोत्पत्तिभूमिः । किं बहुना जन्म-प्रभृति मरणपर्यन्तं तेषामभ्युदयनिःश्रेयससाधनतत्परा सततं स्वसाहि-त्यसरोरसामृतेन तानाप्याययन्ती सर्वथा मङ्गलमयी मातृकल्पैव भारतीयानां देववाणी ।

सत्यपि सत्य एतस्मिंस्तद्विषयकवृत्तान्ते महानेष परितापविषयो यत् तस्या आधुनिकप्रवाहो न सन्तोषावहः । सत्यं प्राचीनग्रन्थोद्धारः प्रतिदिनं क्रियमाणः श्रुतिपथमायाति । सत्यं यत्तस्या अध्ययनाध्यापनं सुदूरदेशान्त-रेषु क्रियते । तस्या गौरवं यशश्च प्रतिदिनमुत्तरोत्तरं विवर्धमानं सान्वयति नो भारतीयानां चेतांसि । तथापि सर्वमेतत्प्राचीनसाहित्यमात्रविषयकम् । अद्यत्वे तस्याः साहित्यस्य गतिरवनतिमुखी एवेत्यत्र नहि कस्यचिद् विवादः । चिरादेव नानाशास्त्रेषु नूतनविचाराणां सृष्टिस्तद्द्वारा तस्याः साहित्यस्य समुन्नतिश्चावरुद्धा दृश्यते । सन्तु केचिदङ्गुलिनिर्देश्याश्चर्वित-चर्वणपिष्टपेषण-कारिणष्टीकाटिप्पणीकर्तारः, परन्तु वस्तुतः स्वापज्ञविचारविचारकाणां नूतन-ग्रन्थनिर्मातॄणां सर्वथाऽभाव एव । ज्योतिष-दर्शन-वैद्यकप्रभृतिशास्त्राणां प्रायशः सर्वेषां विषये समानेयमवस्था । न चापि तस्या अध्ययनाध्यापनसौलभ्यं प्रचारबाहुल्यं च यथाभीष्टं विद्यते । पुरा खलु "महान् हि शब्दस्य प्रयोगविषयः । सप्तद्वीपा वसुमती त्रयो लोका" किञ्च 'शवतिर्गतिकर्मा कम्बो-जेष्वेव भाषितो भवति । विकार एनमार्या भाषन्ते शव इति । (महाभाष्ये-पस्पशाह्निके) इत्यादि प्रमाणेभ्यो न केवलं भारतवर्ष एव किन्त्वस्माद् बहिरपि तस्याः प्रचारः आसीदित्यवगम्यते । "तत्रायमप्यर्थ इदमपि सिद्धं भवति प्राजितेति । किञ्च भो इष्यत एतद्रूपम् ? बाढमिष्यते । एवं हि कश्चिद् वैया-करण आह—कोऽस्य रथस्य प्रवेतेति । सूत आह । आयुष्मन्नहं प्राजितेति । वैयाकरण आह अपशब्द इति । सूत आह । प्राप्तिज्ञो देवानां प्रियो न त्विष्टिज्ञ इष्यत एतद् रूपमिति । वैयाकरण आह । आहो खल्वनेन दुरु-तेन बाध्यामह इति । सूत आह न खलु वेत्थ सूतः सुवतेरेव सूतो यदि सुवतेः कुत्सा प्रयोक्तव्या दुःसूतेनेति वक्तव्यम्" (महाभाष्ये २।४।५६) उदाहारि भगिनी या त्वं कुम्भं हरसि शिरसानडवाहं साचीनमभिधावन्तमद्राक्षीरिति" (महा-भाष्ये १।१।५८) (क्रमशः)

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अहं रूप्यकमस्मि ।

(हिन्दीलेखस्यानुवादः)

अनुवादकः—चन्द्रकुमारशर्मा 'शाण्डिल्यः' मुलतानम् ।

—o:*:o—

अहं रूप्यकमस्मि ।

अहं शिशूनां शैशवक्रीडनकमस्मि, मिष्टमस्मि । अहं यूनां यौवनप्राणोऽस्मि, मदोऽस्मि । अहमेव जरतां जरा-यष्टिरस्मि, आश्रयोऽस्मि । अहं रूप्यकमस्मि ।

मानवो ममाधीनः; तमहं सहस्रशो नर्त्तयितुमीशे, नर्तयामि, अनर्तयञ्च । मत्तः संसारोऽयं धर्ष्यते; तमहं प्रतिकूलयितुं पारयामि, प्रतिकूलमकरवम्, प्रतिकूलं करोमि च । प्रकृति र्मम वशवर्तिनी आस्ते; तामहं साधयामि, विगुणयामि, भिनद्मि, संकोचयामि च । अहं रूप्यकमस्मि ।

इह विशाले संसारे यदि कोऽपि ईश्वरोऽस्ति तर्हि अहमेव । यदि कोऽपि धर्म्मो विद्यते तर्हि अहमेव । किमपि प्रेम यद्यस्ति, तर्हि अहमेव । अहं रूप्यकमस्मि ।

अहं सत्यमस्मि, शिवमस्मि, सुन्दरमस्मि, सदस्मि, चिदस्मि, अहमानन्दोऽस्मि । लोकोऽप्यहम्, परलोकोऽप्यहम् । अहं हर्षः, अहं शोकः, अहं मोहः, अहं क्षमा । अहं रूप्यकमस्मि ।

मदीये 'झन् झन्' ध्वनौ यदलौकिकं माधु° वरिवर्ति; तद् वीणापाणेर्वीणायां क्व, कमलाधवस्य पाञ्चजन्येऽपि क्व, कोकिलस्य कले कलकलेऽपि क्व, कामिन्या≍कोमले कण्ठेऽपि क्व, ढक्काधारिणो ढक्कायामपि क्व, मृदङ्गेऽपि क्व; तन्त्र्यामपि क्व, 'जलतरंग' नाम्नि वाद्येऽपि क्व, अत्र नास्ति, तत्र नास्ति । सप्तस्वराग्रगण्योऽष्टमोऽहं स्वरः, परमं मधुरमहमस्मि । अहं रूप्यकमस्मि ।

भो ! भो !! गीतागायकाः ! चण्डी-सप्तशतीपाठकाः ! भगवद्भक्ताः ! सत्यनारायणकथानुरागिणः ! रामायणबद्धरागा ! महाभारतमन्तारः ! यूयम् मामकीनं गीतं गायत, मामकं पाठं पठत, मम भक्ताः भवत, मदीया गाथा शृणुत, मयि अनुरज्यत, मामेव मन्यध्वम्, मम शरणम् एत, अहं रूप्यकमस्मि ।

अहं तरण-तारणमस्मि, भव-भयहरणमस्मि, अशरणशरण्यमस्मि, जन-मनोदुःखहरणमस्मि, धवलवर्णमस्मि, मङ्गलकरणमस्मि, पुण्यचरणमस्मि । अहं रूप्यकमस्मि ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

मम घूर्णयिता, ममावहेलयिता, मह्यं द्रोग्धा, किं कोऽपि मत्तो मोक्षमेष्यति ? न कोऽपि, न कोऽपि ।

अहं भूमिपतिरस्मि, जननाथोऽस्मि, नृपनाथो (सम्राट्) ऽस्मि, अहमीश्वरोऽस्मि । अहं रूप्यकमस्मि ।

लंकापुरी—सीताया≍कोपेन तोषेण वा न भस्मसादभूत् । अपि तु मम कोपेन तोषेण च भस्माभूत् । अहं विभीषणे तुष्टिमधारयम् । कौरवाः—द्रुपदसुतायाः शापेन न नाशमीयुः, अपि तु मम शापेन । पाण्डवा मम प्रीति-भाजनान्यासन् । 'जर्मनी' राज्यम्—'ब्रिटिश'—राज्यस्य तथा 'अमेरिका'—राज्यस्य धूर्ततया न पराजयमाप, अपि तु मम धूर्ततया । अहं 'ब्रिटेन' नाम्नि राज्ये प्रसीदामि । अहं रूप्यकमस्मि ।

इष्टदेव मूर्तिः सम्भाषयितुं न पारयति, अहन्तु सम्भाषयामि, अतः इष्टदेवमूर्त्या अपि गरीयोऽस्मि । इष्टदेवः चलितुं न शक्नोति, अहं तु चलामि, अत इष्टदेवात् श्रेयान् मम प्रयासः । नहि ता देवता आकर्षणकारिकाः, यादृक् मयि विद्यते आकर्षणम् । मत्सदृशं तेज≍प्रभावपि न विद्यते । तस्मिन् प्रभौ न तावती शक्तिः विद्यते, यादृशी मय्यस्ति । अहं रूप्यकमस्मि ।

न कलियुगमदः, अपि तु तर्कयुगम्, उदाहरणयुगम्, प्रत्यक्षयुगम्, स्वयं प्रभुतायुगम् । अहं प्रत्यक्षमस्मि, सद्य≍फलजनकमस्मि, अहं स्वयमेव प्रभुः । अहमपकर्षकमस्मि, ईश्वरोऽस्मि, ईश्वरादपि गुरुरस्मि । अहं रूप्यकमस्मि ।

मत्तः वरमादाय पापं कुरुत; देवा युष्मान् अर्चयिष्यन्ति । मत्तः, आत्तधरा यूयम्—एकमपास्य, द्वावपास्य-सप्तानां घातं कुरुत, प्रत्यक्षं मोक्षमेष्यथ ।

राज्यम् अपरराज्येन सह योधयध्वम्; वर्धमानं मानवीयं क्षेत्रं कर्तयध्वम्, उन्नालयध्वम्; महिलानां मान-मर्यादां पणके सेटकद्वयपरिमिताम्, अहि दशधा क्रीणीत, + विक्रीणीध्वम् । संसारं विधवानाम्, शिशूनाम्, स्थविराणाम्, दीनानाञ्च क्रन्दनै≍पूरयध्वम्; दीर्घनिःश्वासै≍कम्पयध्वम्; धरणी-कम्पं जनयत; प्रलयं कुरुत, किं बहुना ईहानुकूलं सर्वं विधद्ध्वम्, परं मत्तः वरमादाय । अहं सर्वशक्तिमानस्मि । अहं रूप्यकमस्मि ।

भो ! भो !! पौन≍पुन्येनैतत्स्मरत-

"सर्वधर्मान् परित्यज्य, मामेकं शरणं व्रज"

हा...हा...हा अहम्, अहं रूप्यकमस्मि ।

+ अत्र 'परिव्यवेभ्यः क्रियः' इति तङ् ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

अखिलभारतवर्षीय-संस्कृतविश्वविद्यालयान्तर्गतायाः काशी-आयुर्वेदसम्मिलन्याः परीक्षाफलम् ।

आचार्यपरीक्षायां प्रथमविभागे—

छात्रनामानि]	[अध्यापक नामानि—
श्रीगणेशदत्तजोशी ।	ज्योतिश्चन्द्रभट्टाचार्य वैद्यवाचस्पतिः कवीन्द्रविद्यालय काशी ।
श्रीपं० रामशर्माशास्त्री (अयं धर्मशास्त्रेऽपि समुत्तीर्णः)	आयुर्वेदधर्ममहाविद्यालय अमृतसर ।
श्रीगिरिधरशर्मा त्रिवेदी (अयं धर्मशास्त्रेऽपि समुत्तीर्णः)	ज्योतिश्चन्द्र भट्टाचार्य वैद्यवाचस्पतिः कवीन्द्रविद्यालय काशी ।
श्रीजगद्राम शर्मा । (अयं धर्मशास्त्रेऽपि समुत्तीर्णः ।)	पं० रामरत्नशर्मा आयुर्वेद महाविद्यालय बांसबाजार अमृसर ।
श्रीस्वामी लक्ष्मीगिरि आयुर्वेदशास्त्री (अयं धर्मशास्त्रेऽपि समुत्तीर्णः)	पं० हरिदेवजी पाण्डेय आयुर्वेदपाठशाला कलकत्ता ।
श्रीपं० हरि उपासनी	पं० ज्योतिश्चन्द्र भट्टाचार्य वैद्यवाचस्पतिः कवीन्द्रविद्यालय काशी ।
श्रीपं० टीकारामशर्मा उपाध्यायः श्रीरामानुजद्विवेदी	पं० यतीन्द्रनाथ काव्यतीर्थः, सम्मिलनी विद्यालय काशी ।
श्रीसंत प्रतापसिंहः ।	पं० विष्णुदत्त आयुर्वेदाचार्यः, मोगा अमृतसर ।

शास्त्रिपरीक्षायां प्रथमविभागे ।

श्रीताराचन्द्र शर्मा । (अयं धर्मशास्त्रेऽपि समुत्तीर्णः)	पं० रामस्वरूपशास्त्री वैद्यविशारदः सनातनधर्म संस्कृतपाठशाला अबोहरमण्डी फीरोजपुर (पंजाब) ।
श्रासमीरणचन्द्र धरः ।	धीरेन्द्रचन्द्र आयुर्वेद शास्त्री, महेश आयुर्वेद विद्यालय काशी ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

छात्रनामानि]	[अध्यापक नामानि
श्रीश्यामलाल शर्मा ।	पं० कालीकिशोरविद्याविनोदः विद्याप्रबोधिनी पाठशाला काशी ।

द्वितीय विभागे ।

श्रीविक्रमादित्य चतुर्वेदी । श्रीगौरीशंकरमिश्रः । श्रीरामचन्द्रत्रिपाठी ।	यतीन्द्रनाथ काव्यतीर्थः सम्मिलनी-विद्यालय काशी ।
श्रीरामचन्द्र सुरिडयालः ।	पं० कालीकिशोरविद्याविनोदः प्रणवविद्यालय काशी ।
श्रीमोहनप्रसाद शर्मा मिश्रः ।	पं० ज्योतिश्चन्द्र भट्टाचार्य वैद्यवाचस्पतिः कवीन्द्र विद्यालय काशी ।
श्रीतोयनाथ शर्मा (अयं धर्मशास्त्रेऽपि समुत्तीर्णः)	दीनानाथ आयुर्विज्ञानाचार्यः, गंगादेवी पाठशाला काशी ।
श्रीकालीचरण त्रिपाठी	पं० ज्योतिश्चन्द्र भट्टाचार्य वैद्यवाचस्पतिः कवीन्द्र विद्यालय काशी ।
श्रीजयदेवपाठकः (अयं धर्मशास्त्रेऽपि समुत्तीर्णः)	पं० शम्भूदेवशास्त्री षड्दर्शन-विद्यालय काशी ।

वैद्यभूषणपरीक्षायां द्वितीयविभागे ।

श्रीबलवन्त शर्मा (अयं धर्मशास्त्रेऽपि समुत्तीर्णः)	पं० शंकरलाल शर्मा, मानिकबाई संस्कृत-पाठशाला पोरबन्दर गुजरात ।
श्रीशिवदत्त शर्मा	पं० रामस्वरूप शास्त्री, सनातनधर्मसंस्कृत पाठशाला अबोहर मंडी (पंजाब) ।
श्रीहरिचांद (अयं धर्मशास्त्रेऽपि समुत्तीर्णः)	पं० विष्णुदत्त आयुर्वेदाचार्यः मोगा अमृतसर ।
श्रीत्रिपुरानन्द भट्टाचार्यः ।	पं० यतीन्द्रनाथ काव्यतीर्थः संमिलनी विद्यालय काशी ।
श्रीआत्मारामः (अयं धर्मशास्त्रेऽपि समुत्तीर्णः)	स्वामी हरिनारायणजी शास्त्री खासरोड अमृतसर ।
श्रीसंतरामः (अयं धर्मशास्त्रेऽपि समुत्तीर्णः)	पं० विष्णुदत्त आयुर्वेदाचार्यः मोगा अमृतसर ।
श्रीदीवानचन्द वर्मा (अयं धर्मशास्त्रेऽपि समुत्तीर्णः)	पं० रामस्वरूपशास्त्री सनातनधर्म सं० पाठशाला अबोहरमण्डी, फिरोजपुर ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

छात्र नामानि)	(अध्यापक नामानि
श्रीअमरनाथ शर्मा	पं० रामरत्नशर्मा वांसबाजार अमृतसर ।
श्रीमती सुधारानी वसु श्रीमती पद्मादेवी श्रीमती कृष्णादेवी दीक्षित	जगदम्बा आयुर्वेद-विद्यालय काशी ।
श्रीरविदत्त शर्मा	पं० ईश्वरीदत्त शास्त्री वटपति विद्यालय मिश्रपोखरा काशी ।
श्रीसतीशप्रसाद मिश्रः	पं० गिरीशप्रसादमिश्रः सहथा ।
श्रीशंकरलाल शर्मा (अयं धर्म-शास्त्रेऽपि समुत्तीर्णः)	पं० बलवन्तशर्मा, पोरबन्दर स्टेट पाठशाला ।
श्रीमहादेवशर्मा	पं० यतीन्द्रनाथ काव्यतीर्थः सम्मिलनी विद्यालय काशी ।

मध्यमा परीक्षायां प्रथमविभागे ।

श्रीहरिशंकर चौधुरी । श्रीनवकिशोर सेनः । श्रीहरिपद चौधुरी ।	श्रीगणेशचन्द्र कविभूषण, हेरम्ब-नाथ कविरत्न तिलोड़ी शिक्षाश्रम वांकुड़ा ।
श्रीसुधांशुकुमार सेनगुप्तः ।	पं० कालीकिशोर विद्याविनोदः प्रणव विद्यालय काशी ।
श्रीशिवकुमार पाण्डेयः ।	पं० ज्योतिश्चन्द्र भट्टाचार्य वैद्यवाच, स्पतिः कवीन्द्रविद्यालय काशी ।
श्रीगंगाधर नियोगी । श्रीहेमेन्द्रनाथ सेनः ।	पं० गणेशचन्द्र कविभूषण, हेरम्ब-नाथ कविरत्न, तिलोड़ी शिक्षाश्रम वांकुड़ा ।
श्रीशिवराम शर्मा ।	पं० कालीकिशोर विद्याविनोदः प्रणवविद्यालय काशी ।
श्रीमुनीश्वर प्रसादः ।	पं० यतीन्द्रनाथ काव्यतीर्थः सम्मिलनी विद्यालय काशी ।
श्रीविरंचीलाल शर्मा (अयं धर्म-शास्त्रेऽपि समुत्तीर्णः) ।	पं० लक्ष्मीनारायण राजवैद्यः सरस्वती औषधालय जयपुरम् ।
श्रीभागीरथ शर्मा	पं० कालूरामजी वैद्यः चिड़ावा जयपुरम

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

छात्र नामानि]	[अध्यापक नामानि
श्रीरामलोचनप्रसाद शुक्लः	पं० ज्योतिश्चन्द्र भट्टाचार्य वैद्यवाचस्पति कवीन्द्र विद्यालय काशी ।
श्रीरामानन्द उपाध्यायः	पं० यतीन्द्रनाथ काव्यतीर्थः सम्मिलनी विद्यालय काशी ।
श्रीअवन्ती कुमार भट्टाचार्यः	पं० धीरेन्द्रचन्द्र आयुर्वेदशास्त्री महेश आयुर्वेद विद्यालय, काशी ।
श्रीपारसनाथ पाण्डेयः श्रीपरमानन्द पाण्डेयः	पं० यतीन्द्रनाथ काव्यतीर्थः सम्मिलनी विद्यालय काशी ।
श्रीहरिपद बक्सी	पं० गणेशचन्द्र कविभूषण, हेरम्बनाथ कविरत्न तिलोड़ी शिक्षाश्रम बांकुड़ा ।
श्रीभगवती प्रसाद शर्मा	पं० यतीन्द्रनाथ काव्यतीर्थः सम्मिलनी विद्यालय काशी ।
श्रीसातकड़ी भट्टाचार्यः	पं० ज्योतिश्चन्द्र भट्टाचार्य वैद्यवाचस्पतिः कवीन्द्र विद्यालय काशी ।
श्रीठाकुरदत्त त्रिपाठी	पं० लालचन्द्र वैद्यशास्त्री, आयुर्वेद प्रबोधिनी पाठशाला काशी ।

मध्यमायां द्वितीयविभागे ।

श्रीगणपति भट्टाचार्यः	पं० ज्योतिश्चन्द्र भट्टाचार्य वैद्यवाचस्पतिः कवीन्द्र विद्यालय काशी ।
श्रीमती लावण्यप्रभा देवी	जगदम्बा आयुर्वेद विद्यालय काशी ।
झोपाह्न रामस्वरूप शर्मा	पं० ज्योतिश्चन्द्र भट्टाचार्य वैद्यवाचस्पतिः कवीन्द्र विद्यालय काशी ।
श्रीदुलीचन्द्र गुप्तः	पं० केदारनाथ झा शास्त्री, रामदास औषधालय तथा विद्यालय कटनी जबलपूर ।
श्रीशिवानन्द स्वामी	पं० ज्योतिश्चन्द्रभट्टाचार्य वैद्यवाचस्पतिः कवीन्द्र विद्यालय काशी ।
श्रीद्वारिका पाण्डेयः	पं० यतीन्द्रनाथ काव्यतीर्थः सम्मिलनी विद्यालय काशी ।
श्रीदेवहरि उपाध्याय घिमीरे ।	पं० दीनानाथ आयुर्विज्ञानाचार्यः गंगादेवी पाठशाला काशी ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

छात्र नामानि]	[अध्यापक नामानि
श्रीव्रजमोहनप्रसादः	पं० ज्योतिश्चन्द्र भट्टाचार्य वैद्यवाचस्पतिः कवीन्द्र विद्यालय काशी ।
श्रीरामफलदासः	पं० जानकीनाथ सरस्वती औषधालय नैपालीखपरा काशी ।
वैद्यविशारद पं० हरिराम शर्मा (अयं धर्मशास्त्रेऽपि समुत्तीर्णः)	पं० रामेश्वर शर्मा जगदीशमन्दिर पाठशाला चिड़ावा जयपूर ।
श्रीनामावर शर्मा	पं० ज्योतिश्चन्द्र भट्टाचार्य वैद्यवाचस्पतिः कवीन्द्रविद्यालय काशी ।
श्रीगोटीराम त्रिपाठी	कालीकिशोर विद्याविनोदः प्रणव विद्यालय काशी ।

मध्यमायां तृतीयविभागे ।

गोस्वामी राधामोहन शर्मा (अयं धर्मशास्त्रेऽपि समुत्तीर्णः)	पं० प्यारेलालजी शास्त्री राजवैद्य पटियाला ।
श्रीसुरेशानन्द कुकेरती	पं० महादेव शर्मा शास्त्री, यतीन्द्रनाथ विद्यालय काशी ।
श्रीनारायणदत्त शर्मा	पं० लालचन्द वैद्यशास्त्री, विद्याप्रबोधिनी पाठशाला काशी ।
श्रीभगवानदास मिश्रः	पं० नर्मदाप्रसाद शुक्लः, ऋषिकुल ब्रह्मचर्याश्रम हुशंगाबाद ।
श्रीरामेश्वरदास मिश्रः	पं० रामस्वरूप शास्त्री, सनातनधर्मसंस्कृत पाठशाला अबोहर मण्डी (पंजाब)
श्रीदुर्गादत्त शर्मा	पं० ज्योतिश्चन्द्र भट्टाचार्य वैद्यवाचस्पतिः कवीन्द्र विद्यालय काशी ।
श्रीसदानन्द शर्मा रणुडी (अयं धर्मशास्त्रेऽपि समुत्तीर्णः)	पं० गिरिधरशर्मा शास्त्री लक्ष्मण संस्कृत विद्यालय देहरादून ।
श्रीशिवनाथ शर्मा	पं० ज्योतिश्चन्द्र भट्टाचार्य वैद्यवाचस्पतिः कवीन्द्र विद्यालय काशी ।
श्रीद्वारकाप्रसाद शर्मा (अयं धर्मशास्त्रेऽपि समुत्तीर्णः)	पं० रामेश्वरशर्मा, जगदीश मन्दिर पाठशाला चिड़ावा जयपुर ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

छात्र नामानि]	[अध्यापक नामानि
श्रीकैलाशनारायण आचार्यः	पं० रामकृष्ण शास्त्री संस्कृत पाठशाला भूपाल ।
श्रीपुनतामकर शम्भूनाथ शर्मा श्रीचैतन्यभारती	पं० ज्योतिश्चन्द्रभट्टाचार्य वैद्यवाचस्पतिः, कवीन्द्र विद्यालय काशी ।
श्रीचन्द्रप्रसाद साईंकोटा	दीनानाथ आयुर्विज्ञानाचार्यः, गंगादेवी-पाठशाला काशी ।
श्रीमुरलीधर शर्मा	पं० चिरंजीवलाल शास्त्री, वेद-वेदाङ्ग संस्कृत पाठशाला चिड़ावा जयपूर ।

प्रथमपरीक्षायां प्रथमविभागे ।

श्रीसुधीन्द्रनाथ भट्टाचार्यः ।	पं०कालीकिशोर विद्याविनोद, प्रणव-विद्यालय काशी ।
श्रीशोभनावाला पाल ।	जगदम्बा आयुर्वेदविद्यालय काशी ।
सुकुमार चक्रवर्ती ।	धीरेन्द्रआयुर्वेद शास्त्री महेशआयुर्वेद विद्यालय काशी ।
श्रीमाणिक दासी । श्रीदयामयी देवी ।	जगदम्बा आयुर्वेद विद्यालय काशी ।
श्रीचन्द्रशेखर गौड़माइ । श्रीबलराम शर्मा द्विवेदी ।	पं० नर्मदाप्रसाद शुक्लः, ऋषिकुलब्रह्मचर्याश्रम हुशंगाबाद ।
श्रीसुधीरकुमार बक्सी ।	गणेशचन्द्र चौधरी, हेरम्बनाथ सेनः तिलोड़ी शिक्षाश्रम बांकुड़ा ।
श्रीबलरामः (अयं धर्मशास्त्रेऽपि समुत्तीर्णः ।) श्रीमाधवदत्त शर्मा (अयं धर्मशास्त्रेऽपि समुत्तीर्णः ।)	पं० रामरत्न शर्मा, सनातनधर्म-आयुर्वेद महाविद्यालय अमृतसर ।
श्रीटीकाराम स्वर्णकारः ।	पं० नर्मदाप्रसाद शुक्लः ऋषिकुल ब्रह्मचर्याश्रम हुशंगाबाद ।
श्रीलक्ष्मणप्रसाद शर्मा ।	पं० रामेश्वरशर्मा सरस्वती औषधालय जयपूर ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

छात्र नामानि]	[अध्यापक नामानि
श्रीबुद्धिरामः (अयं धर्मशास्त्रेऽपि समुत्तीर्णः ।)	पं० रामरत्नशर्मा सनातनधर्म आयुर्वेद महाविद्यालय अमृतसर ।
श्रीलक्ष्मीप्रसाद शर्मा भट्टः (अयं धर्मशास्त्रेऽपि समुत्तीर्णः)	पं० गिरिधर शर्मा शास्त्री लक्ष्मण संस्कृत विद्यालय देहरादून ।
श्रीरामनारायण शर्मा (अयं धर्मशास्त्रेऽपि समुत्तीर्णः)	पं० रामेश्वर शर्मा जगदीश मंदिर पाठशाला चिडावा (जयपुर)
श्रीजयदेवशर्मा (अयं धर्मशास्त्रेऽपि समुत्तीर्णः)	पं० गोविन्दराम कविराजः हीवेट् संस्कृत पाठशाला टिहरी गढवाल ।
श्रीमातादीन शर्मा	पं० रामस्वरूप शास्त्री सनातनधर्म संस्कृत पाठशाला अबोहट मंडी पञ्जाब ।
श्रीदेवीन्द्रदत्त शर्मा तिवारी (अयं धर्मशास्त्रेऽपि समुत्तीर्णः	पं० गिरिधर शर्मा शास्त्री लक्ष्मण संस्कृत पाठशाला देहरादून ।
श्रीश्रीनाथचन्द्र पाल चौधुरी	पं० देवेन्द्रनाथ आयुर्वेदभूषण भवानी औषधालय काशी ।
श्रीवंशीधर शर्म्मा	पं० जानकीनाथ शर्मा सरस्वती औषधालय नैपालीखपरा काशी ।

प्रथमायां द्वितीयविभागे ।

श्रीरामप्रपन्न त्रिपाठी	पं० ज्योतिश्चन्द्र भट्टाचार्यः कवीन्द्र विद्यालय काशी ।
श्रीनीलकंठ शर्मा	पं० नन्दवल्लभशास्त्री वटपति विद्यालय काशी ।
श्रीपुरुषोत्तम पन्त	पं० ज्योतिश्चन्द्र भट्टाचार्यः कवीन्द्रविद्यालय काशी ।
श्रीवादी रामचन्द्रशर्मा	प्राइवेट् बनारस ।
श्रीराम शर्मा व्याकरणरत्न ।	पं० लालचन्द्र वैद्यशास्त्री विद्याप्रबोधनी पाठशाला काशी ।
श्रीगिरिधारीलाल शर्मा ।	पं० लक्ष्मीनारायण वैद्यः सरस्वती औषधालय (जयपुर)
श्रीलक्ष्मीनारायण शर्मा ।	पं० जगन्नाथ राजवैद्यः दातव्य औषधालय (जयपुर)

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

छात्र नामानि]	[अध्यापक नामानि
श्रीअतथीलाल शर्मा ।	पं० गोविन्दराम कविराजः, हीवेटरोड
(अयं धर्मशास्त्रेपि समुत्तीर्णः)	संस्कृतपाठशाला टिहरी गढ़वाल ।
श्रीभवानीशंकर शर्मा ।	यतोन्द्रनाथ काव्यतीर्थः
	सम्मिलनी विद्यालय काशी ।
श्रीगिरिधारी मिश्रः	पं० गिरीश प्रसादमिश्रः सहता ।
श्रीराम शर्मा	पं० गोविन्दरामशर्मा हीवेट् रोड
(अयं खलु धर्मशास्त्रेऽपि समुत्तीर्णः)	संस्कृत पाठशाला गढ़वाल ।

प्रथम परीक्षायां तृतीयविभागे—

श्रीमहावीरप्रसाद शर्मा	पं० गोविन्दराम शर्मा ।
(अयं खलु धर्मशास्त्रेऽपि समुत्तीर्णः)	हीवेट रोड टीहरि गढ़वाल ।
श्रीमहादेवप्रसाद शर्मा	पं० गोविन्दराम शर्मा ।
(अयं खलु धर्मशास्त्रेऽपि समुत्तीर्णः)	हीवेट् रोड टिहरी गढ़वाल ।
श्रीअम्बादत्तशर्मा	" " "
(अयं खलु धर्मशास्त्रेऽपि समुत्तीर्णः)	
ब्रह्मचारी निश्चिदानन्दशर्मा ।	पं० ज्योतिश्चन्द्र भट्टाचार्य वैद्यवाच-
	स्पतिः कवीन्द्र विद्यालय काशी ।
श्रीराधाकृष्ण शर्मा	पं० रामेश्वरप्रसाद शास्त्री
(अयं धर्मशास्त्रेऽपि समुत्तीर्णः ।)	जगदीश मंदिर पाठशाला (जयपुर)
श्रीरामकुमारमिश्रः ।	पं० अनन्तदेवत्रिपाठी
	विड़ला वेदवेदाङ्गविद्यालय जयपुर ।
श्रीपरमानन्दशर्मा ।	पं० शम्भूदेवशास्त्री
	षड्दर्शन आयुर्वेद विद्यालय काशी ।
श्रीबाकीप्रसाद उपाध्यायः ।	श्रीरामकृष्णशास्त्री
(धर्मशास्त्रेऽपि समुत्तीर्णः)	संस्कृत पाठशाला भूपाल ।
श्रीविन्दाप्रसाद कुंवर ।	पं० गिरीशप्रसादमिश्रः सहथा ।

आयुर्वेदाचार्य-कविराज पं० ज्योतिश्चन्द्र भट्टाचार्य कविरत्न-
काव्यतीर्थः, विद्याभूषण, सांख्यरत्न, वैद्यवाचस्पतिः,
सम्पादकः—सं० वि० वि० अन्तर्गत
आयुर्वेदसम्मिलनी, नं० ८३ दशाश्वमेध, बनारससिटी ।

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

ऋग्वेदीयोपाकर्मनिर्णयः।

पंडित–अहोबलशास्त्रिकृतः।

अस्मिन् वर्षे ऋग्वेदिनामुपाकर्म भाद्रस्य प्रतिपदि रविवासरे भविष्यति। पण्डितअहोबलशास्त्रिकृता व्यवस्था अधः प्रकाश्यते।

बह्वृचैरोषधिप्रादुर्भावे सति श्रावणमासस्य श्रवणे उपाकर्म कार्यम्। ओषधीनां प्रादुर्भावे श्रवणेन श्रावणस्यैत्याश्वलायनसूत्रात्। आकांक्षितपक्षस्यानुपादानं सूत्रकारस्य। शुक्लादिश्रावणे प्रायेण शुक्लपक्ष एव श्रवणसंभवाऽभिप्रायेण। स्कान्देपि चतुर्दश्यां पौर्णमास्यां प्रतिपद्दिवसेऽपि वा॥ यत्र वा श्रवणं ऋक्षं बह्वृचानां तु तत्स्मृतमिति। तेन पूर्णिमोत्तरकृष्णप्रतिपद्यपि श्रवणपाते भवत्येव तत्रोपाकर्म। तत्र श्रवणं धनिष्ठायुतमौदयिकं ग्राह्यम्। नोत्तराषाढयुतम्। श्रवणेन तु यत्कर्म नोत्तराषाढसंयुतम्॥ संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यति—धनिष्ठासंयुतं कुर्याच्छ्रावणं कर्म यद्भवेत्। तत्कर्म सफलं ज्ञेयमुपाकरणसंज्ञितम् इति व्यासोक्तेः। पर्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः॥ बह्वृचाः श्रवणे कुर्युर्हस्तर्क्षे सामवेदिनः इति गोभिलोक्तश्च। बह्वृचपरिशिष्टे तु ग्रहसंक्रांतिवर्जित इति चतुर्थः पादः पठितः। औदयिकानि च पर्वादीनि विशिनष्टि। गार्ग्यः—श्रावणी पौर्णिमासी तु संगवात्परतो यदि तदैवौदयिकी ग्राह्या नान्या त्वौदयिकी भवेत् इति। पौर्णमासीग्रहणं हस्तश्रवणयोरुपलक्षणम्। उदये संगवस्पर्शे श्रुतौ पर्वणि चार्कभे। कुर्युर्नभस्युपाकर्म ऋग्यजुःसामगाः क्रमात् इति पृथ्वीचन्द्रोदयोद्धृतवचनात्। अत्र पर्वादीनि उदयमारभ्य संगवव्यापीनि मुख्यानि, संगवस्पर्शीनि गौणानीति न पूर्वोक्तवचनयोर्विरोधः। एवं च पूर्वोक्तपूर्वाह्णरूपकर्मकालव्याप्तिरपि लभ्यते। उदयमारभ्य संगवस्पर्शाभावे तु सामान्यवचनेन अधिककर्मकालव्याप्त्या यथासंभवं निर्णयः। कर्मकालश्चात्र दैविकत्वात्पूर्वाह्ण एव उत्तराषाढयुतश्रवणनिषेधवचनं तु परदिने उदयमारभ्य संगवस्पर्शिश्रवणसद्भाव एव प्रवर्तते।

इत्यहोबलशास्त्रिणां परामर्शः। प्रकाशकः,

बाबूदीक्षित जडे,

ऋग्वेदाध्यापक, दरभंगा पाठशाला, काशी।

विल्वमंगलस्तोत्रम्।

स्तोत्रमिदं भगवदाराधनाय सर्वश्रेष्ठम्। नित्यकर्मणि पूजापाठाय भक्तानां कृते अद्भुतं स्तोत्रम्। अस्य पाठेन भगवान् नारायणः शीघ्रं तुष्यति। भक्तिप्रचाराय अस्य १०० संख्यात्मकपुस्तकानि प्रकाशितानि संति। निम्नलिखितसंकेतेन विनैव मूल्यं स्तोत्रमिदं मिलिष्यति। भक्तैः शीघ्रं पत्रं प्रेषणीयम्।

प्राप्तिस्थानम्—सेठ छज्जुरामवर्मा,

(पालीवाल) की कोठी,

मु० पो० मुरथल तहसील सोनीपत, जि० रोहतक (पंजाब)

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.

Funding: Tattva Heritage Foundation,Kolkata. Digitization: eGangotri.

संस्कृतज्ञानां कृते, महत्सौकर्यम्

सनातनधर्मोपयोगिनो ग्रन्थाः ।

[निम्ननिर्दिष्टाः ग्रन्था वैज्ञानिक्या युक्त्या सनातनधर्मसिद्धान्तं दृढी कुर्वन्ति । एतेषां विलोकनेन महोपकारो नूनं भावीति तद्ग्रहणार्थं सर्वे निवेशन्ते]

ईशोपनिषद् ॥) केनोपनिषद् ॥) शम्भुगीता १) शक्तिगीता १) संन्यासगीता १) शास्त्रचन्द्रिका १॥), स्वजातीयमहायज्ञ १) धर्मसुधाकर २) योगदर्शन २) वेदान्तदर्शनचतुःसूत्री ।=) सप्तशतीगीता ॥।) धीशगीता ।॥) सूर्यगीता ॥) विष्णुगीता १) धर्मकर्मदीपिका ॥) कर्ममीमांसादर्शन २ भाग १॥)–२) मन्त्रयोगसंहिता १) हठयोगसंहिता ।॥) धर्मकल्पद्रुमः-अष्टमभागपर्यन्तम्-क्रमशो मूल्यम् २) १॥) २) २) २) १॥) २) २) तुलसीकृत-रामायण १॥) चरित्र चन्द्रिका २ भाग १) १॥) सतीचरित्रचन्द्रिका २) श्रीमद्भगवद्गीता गीतार्थचन्द्रिकानामक व्याख्यासहिता २॥) The World's Eternal Religion 3/- मार्कण्डेय पुराणहिन्दी; रहस्योद्घाटिनीटीकासहित प्रथमभाग १), उपदेशपारिजातः ॥) कल्किपुराणम् १॥) गुरुगीता ।) श्रीरामगीता २॥) कठोपनिषत् शाङ्करभाष्य सहिता १=) भाष्य ५) श्रीमद्भागवतम् २॥) आश्वलायनगृह्यसूत्रम् ५) दशकर्मपद्धतिः (सोलहसंस्कार) २॥) श्राद्धविवेकः १॥) प्रतिष्ठामयूखः ॥) शान्तिमयूख १) मन्त्रमहोदधिः ३) देवीभागवतम् २॥) महानिर्वाणतन्त्रम् ४) माधवनिदानम्, २) सांख्यकारिका ॥) चरकसंहिता ४) सुश्रुतसंहिता ४) निरुक्तम् ८) दासबोध २) भारत-भारती १) अत्र व्याकरण-काव्यालङ्कार-पुराण ज्यौतिष-न्यायमीमांसा, वेदान्तनाटक-चम्पू कोशेतिहासग्रन्थाः, तथा अन्यानि विविधानि धार्मिक पुस्तकानि हिन्दीसाहित्यपुस्तकानि च मिलन्ति पत्रं लिखित्वा पुस्तकसूची गृह्यताम् । पत्रप्रेषण–संकेतः—मैनेजर, निगमागमबुकडिपो, भारतधर्मसिण्डिकेट स्टेशनरोड, बनारस कैन्ट ।

ज्यौतिषविज्ञानम् ।

अस्मिन् ग्रन्थे विज्ञानरीत्या ज्यौतिषफलानामुपपत्तिर्वर्णिताऽस्ति । ग्राहकैराशु रूप्यकाष्टमांशः प्रेषणीयः । कुण्डलीनिरीक्षणैषिभिस्तया सह रूप्यकमेकं प्रेषणीयम् ।

प्राप्तिस्थानम्—

राजकुमार गुरु, पण्डित तारादत्त राजज्योतिर्विद्,

रियासत जुब्बल, जिला शिमला ।

Printed by Baldeo Datt Thaker and Published by A. P. Dwivedi at the Bharat Dharma Press, Benares.

CC-0. Bhagavad Ramanuja National Research Institute, Melukote Collection.